भगवत् स्तुतिः (भीष्म कृतं)

भगवत् स्तुतिः (भीष्म कृतं)

भीष्म उवाच |
इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुंगवे विभूम्नि |
स्वसुखमुपगते क्वचिद्विहर्तुं
प्रकृतिमुपेयुषि यद्भवप्रवाहः || 1 ||

त्रिभुवनकमनं तमालवर्णं
रविकरगौरवरांबरं दधाने |
वपुरलककुलावृताननाब्जं
विजयसखे रतिरस्तु मेऽनवद्या || 2 ||

युधि तुरगरजोविधूम्रविष्वक्
कचलुलितश्रमवार्यलंकृतास्ये |
मम निशितशरैर्विभिद्यमान
त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा || 3 ||

सपदि सखिवचो निशम्य मध्ये
निजपरयोर्बलयो रथं निवेश्य |
स्थितवति परसैनिकायुरक्ष्णा
हृतवति पार्थसखे रतिर्ममास्तु || 4 ||

व्यवहित पृथनामुखं निरीक्ष्य
स्वजनवधाद्विमुखस्य दोषबुद्ध्या |
कुमतिमहरदात्मविद्यया य-
-श्चरणरतिः परमस्य तस्य मेऽस्तु || 5 ||

स्वनिगममपहाय मत्प्रतिज्ञां
ऋतमधिकर्तुमवप्लुतो रथस्थः |
धृतरथचरणोऽभ्ययाच्चलद्गुः
हरिरिव हंतुमिभं गतोत्तरीयः || 6 ||

शितविशिखहतो विशीर्णदंशः
क्षतजपरिप्लुत आततायिनो मे |
प्रसभमभिससार मद्वधार्थं
स भवतु मे भगवान् गतिर्मुकुंदः || 7 ||

विजयरथकुटुंब आत्ततोत्रे
धृतहयरश्मिनि तच्छ्रियेक्षणीये |
भगवति रतिरस्तु मे मुमूर्षोः
यमिह निरीक्ष्य हताः गताः सरूपं || 8 ||

ललित गति विलास वल्गुहास
प्रणय निरीक्षण कल्पितोरुमानाः |
कृतमनुकृतवत्य उन्मदांधाः
प्रकृतिमगन् किल यस्य गोपवध्वः || 9 ||

मुनिगणनृपवर्यसंकुलेऽन्तः
सदसि युधिष्ठिरराजसूय एषां |
अर्हणमुपपेद ईक्षणीयो
मम दृशिगोचर एष आविरात्मा || 10 ||

तमिममहमजं शरीरभाजां
हृदि हृदि धिष्टितमात्मकल्पितानां |
प्रतिदृशमिव नैकधाऽर्कमेकं
समधिगतोऽस्मि विधूतभेदमोहः || 11 ||

इति श्रीमद्भागवते महापुराणे प्रथमस्कंधे नवमोऽध्याये भीष्मकृत भगवत् स्तुतिः |